# Gautamadya Maharshayahkrita Shri Mayureshvara Stuti

# ગૌતમાદ્યા મહર્ષયઃકૃતા શ્રીમયૂરેશ્વરસ્તુતિઃ

## Document Information

Text title : Gautamadya Maharshayahkrita Shri Mayureshvara Stuti

File name : mayUreshvarastutiHgautamAdyAmaharShayaHkRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 103 | 2.103 21-30||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ગૌતમાદ્યા મહર્ષયઃકૃતા શ્રીમયૂરેશ્વરસ્તુતિઃ

કમલાકાન્તહૃદય ! હૃદ્યાનન્દવર્ધન ! ।
કમલાકાન્તનમિત ! કમલાસુરનાશન ! ॥ ૨૧॥

કમલાસેવિતપદ ! જય ત્વં કમલાપ્રદ ! ।
કમલાસનવન્દ્યેશ ! કમલાકરશીતલ ! ॥ ૨૨॥

કમલાઙ્કુસુપાદાબ્જ ! કમલાઙ્કિતસત્કર ! ।
કમલાબન્ધુતિલક ! ભક્તાનાં કમલાપ્રદ ! ॥ ૨૩॥

કમલાસૂનુરિપુજ ! કમલાસૂનુસુન્દર ! ।
કમલાપિતૃરત્નાનાં માલયા જય શોભિત ! ॥ ૨૪॥

કમલાસુરબાણાનાં કમલેન નિવારક ! ।
કમલાક્રાન્તકમલકોશજિત્કરપઙ્કજ ! ॥ ૨૫॥

કમલાપતિહસ્તસ્થપદ્મકોશનિભેક્ષણ ! ।
સર્વહૃત્કમલાનન્દ જય સર્વાઘનાશન ! ॥ ૨૬॥

કમલાઙ્કુશહસ્તાબ્જ ! જયવિઘ્નહરાવ્યય ! ।
ત્વયા વિનિહતઃ પાપઃ શક્રાદિભયદો રિપુઃ ॥ ૨૭॥

વજ્રચક્રાદ્યભેદ્યો યો મુનીનામપિ ભીતિદઃ ।
એવં સ્તુત્વા પુપૂજસ્તે ગૌતમાદ્યા મહર્ષયઃ ॥ ૨૮॥

દશભિર્દોર્ભિરાલિઙ્ગ્ય પુપૂજ ગિરિશોઽપિ તમ્ ।
તતસ્તે મુનયઃ પ્રોચુર્મયૂરેશં ચશઙ્કુરમ્ ॥ ૨૯॥

અત્રત્વં સર્વદા તિષ્ઠ સર્વદેવગણૈર્યુતઃ ।
પૂરયન્ ભક્તકાર્યાણિ વારયન્ વિઘ્નસઞ્ચયાન્ ॥ ૩૦॥

ઇતિ ગૌતમાદ્યા મહર્ષયઃકૃતા શ્રીમયૂરેશ્વરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૧૦૩ । ૨.૧૦૩ ૨૧-૩૦॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 103 . 2.103 21-30..

Proofread by Preeti Bhandare

*Gautamadya Maharshayahkrita Shri Mayureshvara Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*